# RAMAKRISHNA MISSION VIDYAMANDIRA

**(Residential Autonomous College affiliated to University of Calcutta)**

**B.A./B.Sc. FIFTH SEMESTER EXAMINATION, DECEMBER 2015**

**THIRD YEAR [BATCH 2013-16]**

Date : 23/12/2015 **SANSKRIT [Hons]**

Time : 11 am – 3 pm **Paper :** VI Full Marks : 100

1. कस्यचि**दे<u>क</u>**स्य प्रश्नस्योत्तरं लेख्यम्। [1×10]

   क) को नाम रुद्राध्यायः? तत्र रुद्रदेवताचारित्रिकवैशिष्ट्यं यथालिखितं तद् यथामति समुपस्थापनीयम्। [1+9]

   ख) भूमिसूक्तं कस्मिन् वेदे वर्तते? कस्येदमार्षम्? सूक्तेऽस्मिन् भूमिवैशिष्ट्यं यथा प्रतिपादितं तत् संक्षेपेणोपस्थापनीयम्। [1+1+8]

**अथवा**

कस्यचन मन्त्र**<u>द्वय</u>**स्य वङ्गवाण्या आङ्गलभाषया वा अनुवादः करणीयः। [2×5]

क) यस्यां पूर्वे पूर्वजना विचक्रिरे
यस्यां देवा असुरानभ्यवर्तयन्।
गवामश्वानां वयसश्च विष्ठा
भगं वर्चः पृथिवी नो दधातु॥

ख) सत्यं बृहदृतमुग्रं दीक्षा तपो ब्रह्म यज्ञः पृथिवीं धारयन्ति।
सा नो भूतस्य भव्यस्य पत्न्युरुं लोकं पृथिवी नः कृणोतु॥

ग) यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे।
शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत्॥

घ) नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरं नमः॥

2. **<u>एक</u>**स्य प्रश्नस्योत्तरं लेख्यम्। [1×10]

   क) "...राजानमुपससार पुत्रो मे जायतां तेन त्वा यजा इति" – राजपदेनात्र कस्य परामर्शः? अस्मत्पदवाच्यश्च कः? तस्य पुत्रस्याभिधानं किम्? उद्धृतांशे या प्रतिज्ञा प्रकटिता सा सम्यक् परिपालिता न वेति पाठ्यांशानुसारं संक्षेपेणोपस्थापनीयम्। [1+1+1+7]

   ख) "स एकया पृष्टो दशभिः प्रत्युवाच" – को जनः केन पृष्टः? पृच्छाविषयः कः? किमासीदुत्तरम्? [1+1+8]

**अथवा**

यस्य कस्यचिद् अनुच्छेद**<u>द्वय</u>**स्य वङ्गभाषया आङ्गलवाण्या वानुवादः करणीयः। [2×5]

क) तस्य ह त्रयः पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलाङ्गूल इति। तं होवाच – ऋषेऽहं ते शतं ददाम्यहमेषामेकेनाऽऽत्मानं निष्क्रीणा इति।

ख) तस्य ह विश्वामित्रो होताऽऽसीज् जमदग्निरध्वर्युर्वसिष्ठो ब्रह्माऽयास्य उद्गाता तस्मा उपाकृताय नियोक्तारं न विविदुः स होवाचाजीगर्तः सौयवसिर्मह्यमपरं शतं दत्ताहमेनं नियोक्ष्यामीति।

ग) स ह तावत्तावदेवान्ववससर्प्प तदप्येतदुत्तरस्य गिरेर्मनोरवसर्प्पणमित्यौघो ह सर्व्वाः प्रजा निरुवाहाथेह मनुरेवैकः परिशिशिषे।

घ) यावद्वै क्षुल्लका भवामो बह्वी वै नस्तावन्नाष्ट्रा भवत्युत मत्स्य एव मत्स्यं गिलति कुम्भ्यां माऽग्रे बिभरासि। स यदा तामतिव्वर्धाऽअथ कर्षूं खात्वा तस्यां मां बिभरासि।

3. यथेच्छ**मेकस्य** प्रश्नस्योत्तरं प्रदेयम्। [1×10]

क) बृहदारण्यकोपनिषदि आत्मतत्त्वलाभस्य य उपायः प्रतिपादितः सः प्रतिपादनीयः।

ख) कस्मिन् वेदे बृहदारण्यकोपनिषदः अन्तर्भावः? कथमेवमभिधानमस्याः? तत्र जीवात्मन उत्क्रान्तिविषये या विवृता सा समासेनोपस्थापनीया।

4. वङ्गभाषया आङ्गलभाषया वा यथेच्छं **द्वयो**रनुवादः कार्यः। [2×6]

क) सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात्, स्यां न्वहं तेनामृताहो नेति, नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितं स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति।

ख) अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायां रताः॥

ग) स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति। न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्यः।

घ) तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति।

5. कश्चि**देको** मन्त्रः सप्रसङ्गं व्याख्येयः। [1×8]

क) अणुः पन्था विततः पुराणो
मां स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः
स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥

ख) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितम्।

6. कश्चि**देकः** प्रश्नः समाधेयः। [1×12]

क) को नाम व्यवहारः? तस्य कति पादाः? के च ते? प्रत्येकं विशद्यताम्। [2+1+1+8]

ख) किं नाम स्त्रीधनम्? स्त्रीधनविषये याज्ञवल्क्यस्याभिमतं समासेनालोचनीयम्। [2+10]

7. कश्चि**देकः** श्लोकः सप्रसङ्गं व्याख्येयः। [1×7]

क) साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः।
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः॥

ख) आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात्।
आगमेऽपि बलं नैव भुक्तिः स्तोकाऽपि यत्र न॥

8. कस्यापि **द्वितय**स्य टिप्पनी रचनीया। [2×3]

साहसम्, प्रतिभूः, आधिः, उपनिधिः

9. यथेच्छ**मेक**स्य प्रश्नस्योत्तरं लेख्यम्। [1×10]

क) धर्मशास्त्रेतिहासे मनुसंहिताया योगदानमालोचनीयम्।

ख) नव्यस्मृतिसाहित्येतिहासे रघुनन्दनस्य स्थानं निर्णेयम्।

10. यत्किमपि विषय**त्रय**मवलम्ब्य टीका रचनीयाः। [3×5]

नारदस्मृतिः, कात्यायनः, मिताक्षरा, मन्वर्थमुक्तावली, शूलपाणिः, जीमूतवाहनः

———— × ————